International Journal of Sanskrit Research 2019; 5(2): 120-122

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(2): 120-122
© 2019 IJSR
www.anantaajournal.com
Received: 12-01-2019
Accepted: 28-02-2019

डॉ० धर्मवीर
सहायकप्राध्यापक (संस्कृत साहित्य),
राजकीय संस्कृत महाविद्यालय,
भागलपुरम्

Correspondence
डॉ० धर्मवीर
सहायकप्राध्यापक (संस्कृत साहित्य),
राजकीय संस्कृत महाविद्यालय,
भागलपुरम्

# शिशुपालवधमहाकाव्ये पदवक्रत्वनिदर्शनम्

डॉ० धर्मवीर

**प्रस्तावना**

साहित्यशास्त्रे रस–ध्वनि–रीत्यलङ्कार–वक्रोक्तयौचित्यरूपाः षट् सम्प्रदायाः प्रतिष्ठापिता विद्यन्ते तेषु सम्प्रदायेष्वन्यतमस्य वक्रोक्तिसम्प्रदायस्य प्रवर्तकोऽस्ति आचार्यकुन्तकः। 'वक्रा उक्तिः' वक्रोक्तिः अर्थात् ऋजुमार्गमनवलम्ब्य सामान्यलोकव्यवहारापेक्षया भिन्नरूपेण शब्दार्थयोर्वचनम्। काव्येषु शास्त्रेषु च अनेकेष्वर्थेषु कविभिः शास्त्रकारैश्च 'वक्रोक्ति' शब्दः प्रयुक्तोऽस्ति। प्राचीनकवयः वाक्छलं, परिहासकथनं क्रीडालापः, वचनविदग्धता इत्यादिष्वर्थेषु वक्रोक्तिरिति शब्दं प्रयुक्तवन्तः। शास्त्रकारेष्वपि केचन तां वक्रोक्तिं काव्यसौन्दर्याधायकतत्त्वरूपेण केचन उपमादिरिव अलङ्काररूपेण, अपरे केचन काव्यात्मरूपेण अङ्गीचक्रुः।

आचार्यकुन्तकः वक्रोक्तिजीविते वक्रोक्तिं भेदोपभेदसंहितां सोदाहरणञ्च निरूपितवान्। अपि च तां काव्यात्मरूपेण प्रतिष्ठापितवान्। तेन काव्यलक्षणमपि वक्रोक्तयाधारेणैव एवं दत्तमस्ति–

**शब्दार्थो सहितौ वक्रकविव्यापारशालिनि।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।** [1]

वक्रोक्तिर्नाम का इति जिज्ञासायां वैदग्ध्यभङ्गीभणितिरिति तेन स्पष्टीकृतम्। वक्रोक्तिरियं वर्णविन्यासवक्रता, पदपूर्वार्द्धवक्रता, पदपरार्धवक्रता, वाक्यवक्रता, प्रकरणवक्रता, प्रबन्धवक्रता चेति षोढा विभक्ता आचार्येण।

पञ्चमहाकाव्येषु अन्यतमं माघमहाकविविरचितं शिशुपालवधम्। शिशुपालवधे वक्रोक्तेः विलासः सहदयहृदयहारी वर्तत इत्येतावदेव न, किन्तु वक्रोक्तिरेव तस्य काव्यस्याधारस्तम्भायत इत्युक्तिर्नातिशेते। तत्रस्था पदवक्रतासौन्दर्यं किञ्चिदत्र प्रस्तूयते। 'पदम्' एवं व्युत्पद्यते यत् 'पद्यते गम्यतेऽर्थोऽनेनेति'। सामान्यतः काव्येषु गम्यमानस्यैवार्थस्य प्राधान्यं भवति कविविवक्षितत्वात्, न तु वाच्यार्थस्य। स चार्थः, कदाचित् पदेन, कदाचिच्च अर्थेनैव गम्यते। यत्र सः पदगम्यः भवति तत्र पदे वर्तमानप्रकृत्या, प्रत्ययेन वा भवति। वक्रोक्तिं काव्यात्मत्वेनाङ्गीकुर्वता कुन्तकेन सोऽर्थः वक्रोक्तिमूलम्। अतः प्रकृतौ वर्तमाना वक्रोक्तिः पदपूर्वार्धवक्रतेति, प्रत्यये वर्तमाना वक्रोक्तिः पदपरार्धवक्रतेति च तेन व्यवस्थितम्। तत्र–

1. **पदपूर्वार्धवक्रता**– पदपूर्वार्धवक्रतायाम् अमी अष्टौ भेदाः सम्भवन्ति– 1.रूढिवैचित्र्यवक्रता, 2. पर्यायवक्रता, 3. उपचारवक्रता, 4. विशेषणवक्रता, 5. संवृतिवक्रता, 6. वृत्तिवैचित्र्यवक्रता, 7. लिङ्गवैचित्र्यवक्रता, 8. क्रियावैचित्र्यवक्रता चेति।

**माघकाव्ये एतासां वक्रोक्तीनां सौन्दर्यं कथमस्तीति पश्यामः।**

**1. रूढिवैचित्र्यवक्रतासौन्दर्यम्**– यत्र वाच्यार्थस्य सर्वातिशायी तिरस्कारः अथवा प्रशंसनीयोत्कर्षस्य कथनेच्छया, रूढिद्वारा असम्भाव्य– धर्माध्यारोपगर्भत्वम् अथवा पदार्थस्य विद्यमानधर्मस्यातिशयप्रतिपादनाभिप्रायः प्रतीयते तत्र रूढिवैचित्र्यवक्रता भवति।

माघकाव्ये प्रथमसर्गे एव रूढिवैचित्र्यवक्रताया उदाहरणं द्रष्टुं शक्यते। यथा–

**हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।**
**शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्।।** [2]

शरीरं भजन्ते सेवन्ते ये, ते शरीरभाजः, तेषाम्। एकमात्रस्य शरीरस्य सेवने तथा रक्षणे आसक्ताः। एतद्वारा देहासक्तानां प्राणिनां कृते मुनिदर्शनम् अत्यन्तलाभाय भवति। एतदर्थं माघकविः

नर–मनुष्य–जीवेत्यादि वाचकपदानां प्रयोगमकृत्वा 'शरीरभाजां' इति पदं प्रयुक्तवान्। अत्र शरीरभाजाम् इति पदे रूढिवैचित्र्यवक्रताद्वारा चमत्कार उत्पादितः।

**2. पर्यायवक्रतासौन्दर्यम्–** समानार्थकशब्दः 'पर्याय' उच्यते। एकस्यैव शब्दस्य अनेके समानार्थकाः भवन्ति, किन्तु यत्र कविः वर्ण्यविषयस्यातिशय– सौन्दर्यस्योन्मीलनाय समानार्थपदानां मध्ये एकस्य विशिष्टस्य पर्यायस्य चयनं करोति तत्र पर्यायवक्रता भवति। शिशुपालवधकाव्ये एकादशसर्गे प्रातःकालीनदृश्यानां वर्णनं कुर्वन् ब्रह्मणः कार्याणां विचित्रतां पर्यायवक्रताद्वारा माघः दर्शयत्येवम्–

**कुमुदवनमपपश्रि श्रीमदम्भोजषण्डं, त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।**
**उदयमहिमरश्मिर्याति शीतांशुरस्तं, हतविधिलसितानां ही विचित्रो विपाकः।।[3]**

श्लोकेऽस्मिन् 'अहिमरश्मि' रिति सूर्यस्य, 'शीतांशुरिति' चन्द्रस्य पर्यायपदं प्रयुक्तम्। 'अंशु–रश्मि' शब्दौ पर्यायवाचकौ, किन्तु समानतायाः विरोधदर्शनाय सूर्यकिरणानाम् 'अहिम' तथा चन्द्रस्य किरणानां शीतत्वमुक्त्वा क्रमशः सूर्यचन्द्रयोरर्थः कृतः।

**3. उपचारवक्रतासौन्दर्यम् –** यत्र प्रस्तुतत्वाद्वर्ण्यमाने वस्तुनि साधारणो धर्मः कश्चिद्वक्तुमभिप्रेतः समारोप्यते तत्र उपचारवक्रता भवति। यथा–

**ह्रीभरावनतं परिरम्भे रागवानवटुजेष्ववकृष्य।**
**अर्पितोष्ठदलमाननपद्मं योषितो मुकुलिताक्षमघासीत्।।[4]**

अत्र 'अर्पितोष्ठदलमाननपद्मम्' इत्यत्र रूपकालङ्कारद्वारा उपचारवक्रतायाः सुन्दरचित्रणं कृतमस्ति। अत्र मूर्तमुखस्योपरि अमूर्तपद्मस्य य आरोपः कृतः सः अत्यन्तं चमत्कारी वर्तते।

**4. विशेषणवक्रतासौन्दर्यम् –** यत्र विशेषणस्य माहात्म्यात् क्रियायाः कारकस्य वा लावण्यमुल्लसति तत्र विशेषणवक्रता भवति। श्रीकृष्णस्य सम्मुखे उपस्थितस्य नारदस्य शोभा वर्णयन् कविरेकस्मिन् श्लोक एवं वदति–

**महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे।**
**श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम्।।[5]**

अत्र 'महानीलमणिः' इति श्रीकृष्णस्य विशेषणं दत्तम्। नीलमणिः प्राय आकारे लघुर्भवति, किन्तु माघः 'महा' शब्दं प्रयुज्य न केवलं श्रीकृष्णस्य विशालाकारं सङ्केतितवान्, अपितु इन्द्रनीलमणेर्महत्तायाः। कल्पनामपि प्रस्तुतवान्। ज्योतिश्शास्त्रदृष्ट्या नीलमणेः प्रयोगः शनिग्रहपीडानिवारणार्थं भवति। एतदर्थमत्र कृष्णस्य 'कंसकृषः' इति नाम कृतम्। शनिग्रहसदृशं संसारपीडकं कंसं, नीलमणिद्युतिमान् कृष्णः नाशितवानित्यंशोऽत्र प्रच्छन्नतया सङ्केतितः।

**5. संवृतिवक्रतासौन्दर्यम् –** यत्र वैचित्यस्य विवक्षया सर्वनामादिभिः पदार्थलक्षणं संव्रियते तत्र संवृतिवक्रता भवति। यथा–

**तत्पतिर्यथ परिग्रहलिप्सौ स व्यधत्त करणीयमणीयः।**
**पुष्पचापशिखरस्थकपौलौ मन्मथः किमपि येन निदध्यौ।।[6]**

अत्र भीष्मस्य इन्द्रियदमनरूपस्य अद्भुतकार्यस्य प्रशंसनं कवेः मुख्यमभिप्रेतमासीत्। अस्य स्पष्टरूपेण कथनस्य सम्भवेऽपि 'किमपि' इति सर्वनामप्रयोगेण तस्य स्पष्टकथनस्य संवरणं कृत्वा कविनाऽत्र कामदेवमतीवचिन्ता– मग्नमकरोदित्येवंप्रकारेण वाक्यान्तरद्वारा सोऽर्थोऽभिव्यञ्जितः। भीष्मेण ब्रह्मचर्यव्रत– पालनेन मम कीर्तिः मलिनी–भवतीति विचिन्त्य कामदेवः चिन्ताग्रस्तः सञ्जातः। एवमत्र संवृतिवक्रातायाः सौन्दर्यं सहृदयानां चमत्कारि वर्तते।

**6. वृत्तिवैचित्र्यवक्रतासौन्दर्यम् –** संस्कृते कृदन्त–तद्धित–समासादीनां 'वृत्ति'रिति नाम। कुन्तकस्याभिप्राये यत्राव्ययीभावादिवृत्तीनां सौन्दर्यं प्रकाशितं भवति तत्र वृत्तिवैचित्यवक्रता भवति। माघकाव्ये श्रीकृष्णं स्तुवन् नारदो वदत्येवम्–

**अनन्यगुर्वास्तव केन केवलः पुराणमूर्तेर्महिमावगम्यते।**
**मनुष्यजन्मापि सुरासुरान्गुणैर्भवान्भवच्छेदकरैः करोत्यधः।।[7]**

अत्र कविना प्रयुक्तस्य 'महिमा' पदस्य स्थाने 'महत्त्वं' अथवा 'महत्ता' शब्दोऽपि प्रयोक्तुं शक्यते स्म, किन्तु कविः 'इमनिच्' प्रत्ययेन निष्पन्न 'महिमन्' शब्दप्रयोगद्वारा काव्यगतसुकुमारभावं प्रादर्शयत्। अत्र वृत्तिवैचित्र्य–वक्रतासौन्दर्यं दृश्यते।

**7. लिङ्गवैचित्र्यवक्रता–** यत्र भिन्नयोलिङ्गयोः सामानाधिकरण्येन काऽपि शोभाऽभ्युदेति तत्र लिङ्गवैचित्र्यवक्रता भवति। यथा–

**तमर्घ्यमर्घ्यादिकमादिपूरुषः सपर्यया साधु स पर्यपूपुजत्।**
**गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः।।[8]**

गृहानुपैतुमित्यत्र गृहाण्युपैतुं इत्यादि पाठमपि कविर्दातुं शक्नोति स्म, किन्तु बहुचनान्तं पुल्लिङ्गगतपाठमेवात्र गृहीतम्। कविर्नपुंसकलिङ्गगतगृहशब्दस्य प्रयोगमकृत्वा, पुल्लिङ्गगतपाठप्रयोगेण लिङ्गवैचित्र्यवक्रतायाः माध्यमेन चमत्कारमुत्पादितवान्।

**8. क्रियावैचित्र्यवक्रतासौन्दर्यम्–**कवेः रचनाचातुर्येण तिङन्तपदप्रयोगजन्यं वैचित्र्यं क्रियावैचित्र्यवक्रतोच्यते। माघेऽस्या उदाहरणं यथा–

**स्मरत्यदो दाशरथिर्भवन्भवानमुं वनान्ताद्वनितापहारिणम्।**
**पयोधिमाबद्धचलज्जलाविलं विलङ्घ्य लङ्कां निकषा हनिष्यति।।[9]**

अत्र श्लोके 'हतवान्' इति भूतकालस्य स्थाने 'हनिष्यति' इति लृट्–लकारः प्रयुक्तः। 'हनिष्यति' इति तिङन्तपदप्रयोगेणात्र चमत्कार उत्पादितः। अतोऽत्र क्रियावैचित्र्यवक्रता भवति।

**2 पदपरार्धवक्रतासौन्दर्यम्–** पदपरार्धवक्रताया अपि अष्टौ भेदाः सम्भवन्ति। तत्र क्रियावैचित्र्यवक्रतायाः समनन्तरमसम्भविनः कालस्य वक्रत्वं प्रथमं पर्यालोच्यते।

**1. कालवैचित्र्यवक्रता –** यत्र औचित्यस्य अन्तरङ्गत्वेन समयः रमणीयतां याति तत्र कालवैचित्यवक्रता भवति। यथा–

**स्मरत्यदो दाशरथिर्भवन्भवानमुं वनान्ताद्वनितापहारिण्।**
**पयोधिमाबद्धचलज्जलाविलं विलङ्घ्य लङ्कां निकषा हनिष्यति।।[10]**

अत्र कविः 'जघान' इत्यादिभूतकालिकप्रयोगमकृत्वैव भूतकालस्य स्थाने भविष्यत्कालिकप्रत्ययं प्रयुक्तवान्। एषः प्रयोगः कालवैचित्यवक्रतायाः सौन्दर्यमुत्पादयति।

**2. कारकवक्रता–** यत्र कारकाणां परिवर्तनेन चमत्कार उत्पद्यते तत्र कारकवक्रता भवति। यथा–

**निजौजसोज्जासयितुं जगदद्रुहामुपाजिहीथा न महीतलं यदि।**
**समाहितैरप्यनिःपितस्ततः पदं दृशः स्याः कथमीश! मादृशाम्।। [11]**

कविरत्र जगद्द्रुहामिति प्रयुक्तवान्। जगद्भयो द्रुह्यन्तीति जगद्रुहः कंसादयः तान् उज्जासयितुं हिंसितुम् इत्यर्थः। जासिनिप्रहण इत्यादिना कर्मणि शेषे षष्ठी। अत्र कविना द्वितीयायाः स्थाने षष्ठ्याः प्रयोगः कृतः। अनेनात्र कारकवक्रतासौन्दर्यं सिद्धम्।

**3. सङ्ख्यावक्रता–** यत्र कवयः काव्यवैचित्र्यविवक्षापरतन्त्रिताः सङ्ख्याविपर्यासं वचनपरिवर्तनं वा कुर्वन्ति तत्र सङ्ख्यावक्रता भवति। उदाहरणम्–

**कलासमग्रेण गृहानमुञ्चता मनस्विनीरुत्कयितुं पटीयसा।**
**विलासिनस्तस्य वितन्वता रतिं न नर्मसाचिव्यमकारि नेन्दुना।।**[12]

अत्र 'गृहान्' इति पुल्लिंङ्गगतबहुवचनान्तप्रयोगः संख्यावैचित्र्यवक्रता– सौन्दर्यमुत्पादयति।

**4. पुरुषवक्रता–** यत्र वैचित्र्याय निजात्मभावः परभावश्च विपर्यासेन योज्यते तत्र पुरुषवक्रता भवति। माघकाव्ये राजा युधिष्ठिरः श्रीकष्णं स्तुवन् एवं गदति–

**बह्वपि प्रियमयं तव ब्रुवन्न व्रजत्यनृतवादिनां जनः।**
**सम्भवन्ति यददोषदूषिते सार्वं सर्वगुणसम्पदस्त्वयि।।**[13]

अत्र कविः काव्यवैलक्षण्यप्रकाशनाय वक्रोक्तिपूर्वकं युधिष्टिरद्वारा 'अस्मद्' शब्दस्य 'अहम्' इति स्थाने 'अयं जनः न व्रजति' इति प्रयोगं कारितवान्। यः प्रयोगः पुरुषवक्रतासौन्दर्यमुत्पायति।

**5. उपग्रहवक्रता–** यत्र औचित्यस्य शोभायै पदयोरुभयोर्मध्य एकमात्मनेपदं परस्मैपदं वा विनियुज्यते तत्र उपग्रहवक्रता भवति। माघकाव्यस्य द्वितीयसर्गे यथा–

**उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।**
**समौ हि शिष्टैरानातौ वर्त्स्यन्तावामयः स च।।**[14]

अत्र 'उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता' इति कथने उत् उपसर्गपूर्वकस्थाधातोः शानच् प्रत्यये विहिते सति निष्पन्नोऽयं उत्तिष्ठमानः इति शब्दः। अत्र 'उदोनूर्ध्व कर्मणि' इति सूत्रेणात्मनेपदम् अभिलषितम्। अत्र आत्मनेपदप्रयोग उपग्रहवक्रतां सूचयति।

**6. प्रत्ययवक्रता–** यत्र प्रत्ययात् प्रत्ययः कामप्यपूर्वां कमनीयतां पुष्णाति तत्र प्रत्ययवक्रता भवति। माघकाव्ये अस्या उदाहरणं यथा–

**न दूये सात्वतीसूनूर्यन्मह्यमपराध्यति। यत्तु दन्दह्यते लोकमदो दुःखाकरोति माम्।।**[15]

अत्र केवलं 'दहति' इति प्रयोगेण परस्मैपदं भवति, परन्तु प्रत्ययविशेषस्य प्रयोगेण आत्मनेपदं प्रयुक्तम्। आत्मनेपदप्रयोगेण अत्र प्रत्ययवक्रतासौन्दर्यमुत्पादितम्।

**7.** नामाख्यातोपसर्गनिपातभेदेन पदं चतुर्विधं भवति। उपसर्गनिपातावपि रसभावादिपोषणं कुरुतः। कुन्तकः वदति यत् पदपूर्वार्ध–परार्ध वक्रताया विलक्षणा पदवक्रता, अस्यामुपसर्ग–निपातद्वारा काव्यबन्धे व्याप्तस्य रसभावस्य च स्फुरणं भवति। शिशुपालवधमहाकाव्ये उपसर्गनिपातवक्रतासौन्दर्यस्यापि उदाहरणानि द्रष्टुं शक्नुमः।
एवं पदवक्रतायाः सर्वेऽपि भेदाः काव्यबन्धे निबद्धाः माघेन शिशुपालवधमहाकाव्ये। अस्या वक्रतायाः सौन्दर्यं सम्पूर्णमहाकाव्ये सर्वाधिक्येन दरीदृश्यते।।इति शम्।।

**संदर्भग्रन्थसूची**


1. वक्रोक्तिजीवितम् 1/7
2. शिशुपालवधम् 1/26
3. शिशुपालवधम् 11/64
4. शिशुपालवधम् 10/52
5. शिशुपालवधम् 1/16
6. शिशुपालवधम् 2/58
7. शिशुपालवधम् 1/35
8. शिशुपालवधम् 1/35
9. शिशुपालवधम् 1/68
10. शिशुपालवधम् 1/68
11. शिशुपालवधम् 1/37
12. शिशुपालवधम् 1/59
13. शिशुपालवधम् 14/4
14. शिशुपालवधम् 2/10
15. शिशुपालवधम् 2/11
16. अलङ्कारशास्त्र का इतिहास
17. शिशुपालवधम्
18. वक्रोक्तिजीवितम्